चुटकुला-शतकम्

[संस्कृत-हिन्दी]

प्रथम भाग

लेखन एवं संकलन :

आचार्य रामदयालु एम. ए.

(इस पुस्तक की समस्त आय संस्कृत प्रचार-प्रसार के लिए समर्पित)

प्रथम संस्करण ११००] सर्वाधिकार लेखकाधीन [मूल्य ३·५०

मुद्रक— तिलक प्रिंटिंग प्रेस, बाजार सीताराम, दिल्ली-६

आचार्य रामदयालु की अन्य पुस्तकें

१. क्रीड़ा पंचविंशतिः	(संस्कृत-प्रकाशित)
२. चुटकुला शतकम्	(संस्कृत, हिन्दी-प्रकाशित)
३. भाष्य भूमिका सारः	(संस्कृत-समाप्त)
४. हिन्दी व्याकरण नियमावली	(हिन्दी-समाप्त)
५. प्रतिनिधि शब्द रूपावली	(संस्कृत प्रकाश्यमान)
६. प्रतिनिधिधातु रूपावली	(संस्कृत प्रकाश्यमान)
७. कृम्वस्ति विधिः	(संस्कृत, हिन्दी-प्रकाश्यमान)
८. गृह शब्द कोशः	(संस्कृत, हिन्दी, अंग्रेजी अप्रकाशित)
९. व्यंग्य-विनोद शतकम्	(संस्कृत-प्रकाश्यमान)
१०. विद्यालय संस्कृत सर्वेक्षण	(हिन्दी प्रकाश्यमान)
११. संस्कृत रक्षा के विशेष उपाय	(प्रकाश्यमान)
१२. संस्कृत गीतावली	(संस्कृत-प्रकाश्यमान)
१३. संस्कृत शिक्षण चार्ट	(संस्कृत-प्रकाश्यमान)
१४. संस्कृत क्रियांग योग	(संस्कृत, हिन्दी-प्रकाश्यमान)
१५. संस्कृत शिक्षण समस्याएं	(हिन्दी-प्रकाश्यमान)
१६. रसालंकार छन्दोदीपिका	(हिन्दी-प्रकाशित)
१७. संस्कृत वाक्य पट्टिका	(हिन्दी, अंग्रेजी अर्थसहित)
१८. अनुभव शतकम्	(संस्कृत, हिन्दी-अप्रकाशित)

पुस्तक प्राप्ति स्थान :—
कार्यालय—संस्कृत सेवा संस्थानम्
गृह सं० ३२३०, लाल दरवाजा,
बाजार सीताराम, दिल्ली-६

हिन्दी भाषया समन्वितम्

चुटकुला-शतकम्



(१) एकः रुग्णः जनः मूर्च्छायाः चेतनामागत्य अपश्यत् यत् समागतजनाः शोकनिमग्नाः सन्ति अथ च काश्चित् महिलाः रुदन्ति। सः अपृच्छत् का वार्ताऽस्ति ? जनाः अवदन्-अधुनैव चिकित्सकमहोदयः भवन्तं मृतम् उक्त्वा गतः अस्ति। रुग्णः अकथयत्-न, भ्रातरः ! नैवम्। अहम् तु भवत् समक्षे अधुनाऽपि जीवामि। सपदि तस्य पत्नी आह—महोदय ! मौनम् अवलम्बस्व मौनम्। अलं विवादेन। सः चिकित्सकः भूत्वा कथम् असत्यं वदेत् ? इति।

(२) एकस्मिन् दिने प्रातः प्रभृति रात्रौ अष्टवादनं यावद् विद्युद् अवरुद्धाऽभवत्। बालानां जननी बड्बडायते स्म यद् एतावती रात्रिः सञ्जाता परम् अधुनाऽपि विद्युत् नागता। सहसैव एकः कनिष्ठबालः अवदत्—अम्ब ! त्वम् अपि एवमेवासि। एतावन्मात्रम् अपि न जानासि यद् एतादृशे तमसि विद्युत् कथम् आयात् शक्नोति ! किम् सा त्रसिष्यति नैव ?

(३) महति तपति च ग्रीष्मकाले केचिद् जनाः सपत्नीकाः कुत्रापि मेलां दृष्टुं गच्छन्ति स्म। वाष्पयाने अति सम्मर्दः आसीत्। तापेन पीडिताः सर्वे जनाः स्वेदक्लिन्नाः आसन्। कश्चिद् आह—एतादृशे कष्टे एतासां नारीणां गमनेन तत्र किं प्रयोजनम् ? एताभ्यः तत्र किम् अस्ति ? तासु एका मनश्चला प्राह—यदि नार्यः न गच्छन्तु तर्हि पुरुषेभ्यः एव तत्र किमस्ति ?

(४) एकदा एकेन अबुधेन जनेन अश्वधावन-प्रतियोगितायां पारितोषिकं प्रमाणपत्रं च प्राप्तम्। स अचिन्तयत्—अहम् एतेन अश्वेनैव एतावन्मात्रम् पारितोषिकम् प्राप्तुम् अशक्नुवम्। तद् एतस्मै अश्वाय अपि कस्यचिद् विश्वविद्यालयस्य प्रमाणपत्रं कथन्न स्यात् ! स स्वप्रमाणपत्रम् अधिकारिणे दर्शयित्वा

(१) एक बीमार आदमी ने होश में आकर देखा कि आस-पास बैठे सभी लोग उदास बैठे हैं, कुछ औरतें रो रही हैं। उसने पूछा क्या बात है तो लोगों ने बताया—अभी-अभी डाक्टर साहब आपको मरा हुआ बताकर गए हैं। बीमार ने कहा, नहीं भाई नहीं। मैं तो आपके सामने अभी जिन्दा हूँ। तुरन्त उसकी औरत बोली—चुप रहो जी चुप। बहस मत करो। वे डाक्टर होकर झूठ थोड़े ही बोलेंगे।

(२) एक दिन सुबह से रात आठ बजे तक बिजली बन्द रही। बच्चों की मां बड़बड़ा रही थी कि इतनी रात हो गई लेकिन अभी तक बिजली नहीं आई। अकस्मात् एक छोटा बालक बोला कि मां तुम भी खूब हो, इतना भी नहीं सोचती कि बिजली ऐसे अंधेरे में कैसे आ सकती है क्या उसे डर नहीं लगेगा ?

(३) भरपूर गर्मी के मौसम में कई लोग अपनी पत्नियों समेत कहीं मेला देखने जा रहे थे। गाड़ी में बहुत भीड़ थी, गर्मी के मारे पसीने से सभी तरबतर हो रहे थे। किसी ने कहा—ऐसी मुसीबत में इन औरतों को वहां जाने की क्या जरूरत है ? इनके लिए वहां क्या रखा है ? औरतों में से एक मनचली बोली—यदि औरतें न जायें तो मर्दों के लिए ही वहां क्या रखा है ?

(४) एक बार एक अनपढ़ सज्जन को घुड़-दौड़ में इनाम और प्रमाण-पत्र मिल गया। उसने सोचा कि मैं इस घोड़े के कारण ही इतना इनाम पा सका हूं, क्यों न इसे भी किसी विश्व-विद्यालय से एक प्रमाण-पत्र दिलाया जाय। उसने अपना सर्टिफिकेट दिखाकर अधिकारी से कहा

अवोचत्—श्रीमन् मम अश्वस्य कृतेऽपि एकं शोभनम् प्रमाणपत्रं प्रदीयताम् । अधिकारी उदतरत्—वयं गर्दभेभ्य एव प्रमाणपत्रं यच्छामः न तु अश्वेभ्यः ।

(५) एकः भिक्षुकः किञ्चिद् द्वारम् आगत्य भिक्षा अयाचत । बहुकालं नीत्वा अभ्यन्तरात् एकः महोदयः आगत्य अकथयत्—अधुना अत्र कोऽपि मानवः नास्ति, पुनरागन्तव्यम् । भिक्षुकः त्वरितम् अवदत्—अस्तु तावद् भवानेव किञ्चित्कालं मानवः भवतु ।

(६) एकः बालः अन्येन युध्यन् अवदत्-ईदृशीम् चपेटां दास्यामि यत् एककिलोमीटर—दूरे गत्वा पतिष्यसि । अपरः बालः अवदत्—किंचित् शनैः दातव्या । यतः मया तु कानिचित् पदानि एव गन्तव्यानि ।

(७) एकः लालामहोदयः पश्चात् कारयाने उपविश्य गच्छति स्म । सहसा चालकं प्राह—शीघ्रं कारं रोधय । चालकः कारम् अरुणत् तर्हि लाला कारं पश्चात् नेतुम् अकथयत् । किंचिद् दूरे गते लाला अवदत् रोधय । द्वारम् उद्घाट्य पश्य तत्र सम्मुखे एका कलाय-फलिका पतिताऽस्ति । ताम् आनय । लाला फलिकां स्फोटयित्वा अपश्यत्—तस्यां त्रीणि बीजानि आसन् । एकं चालकाय दत्त्वा द्वे च स्वमुखे पातयित्वा अवदत्—दृष्टम्, अस्माभिः सह स्थास्यसि चेत् एवमेव मोदिष्यसे ।

(८) स्वामी कारचालकं टोकित्वा अवदत् - किं करोषि ? चालकः—महोदय ! गीयरपरिवर्तनं करोमि । स्वामिनी अपि तत्रैव स्थिता आसीत् । सा मौनम् धारयितुं नाशक्नोत् अवदत् च—आवयोः पश्यतोः एव गीयरपरिवर्तनं करोषि ? तवेदम् साहसम् ? गीयरं तु किम्, अहम् स्वयानस्य एकं कलम् अपि परिवर्तयितुं न दास्यामि ।

कि श्रीमान जी मेरे घोड़े को भी एक अच्छा-सा प्रमाणपत्र दे दीजिये। अधिकारी बोले कि हम गधों को ही प्रमाण-पत्र देते हैं घोड़ों को नहीं।

(५) एक भिखारी ने किसी दरवाजे पर आकर भिक्षा मांगी। बड़ी देर बाद अन्दर से एक साहब ने आकर कहा कि यहां इस समय कोई आदमी नहीं है फिर किसी समय आना। भिखारी तुरन्त बोला—तो फिर आप ही कुछ समय तक आदमी बन जाइये।

(६) एक लड़के ने दूसरे लड़के से लड़ते हुए कहा कि ऐसा थप्पड़ मारूंगा कि किलोमीटर दूर जाकर पड़ेगा। दूसरे ने कहा जरा धीरे से मारना मुझे तो कुछ कदम ही जाना है।

(७) एक लाला जी पीछे कार में बैठे जा रहे थे। सहसा उन्होंने ड्राइवर से कहा कि जल्दी कार रोको। ड्राइवर ने कार रोक दी तो लाला जी ने कार, पीछे ले चलने को कहा। कुछ दूर कार के पीछे जाने पर कहा रोको और दरवाजा खोलकर देखो सामने एक मटर की फली पड़ी है, उसे ले आओ। लाला जी ने फली को छीलकर देखा तो ३ दाने थे। एक ड्राईवर को देकर दो दाने अपने मुंह में डालकर कहा, देखा हमारे साथ रहोगे तो यही मजे करोगे।

(८) मालिक ने ड्राइवर को टोककर कहा कि क्या कर रहे हो? ड्राइवर—जी गेअर बदल रहा हूं। मालकिन भी वहीं बैठी थी उससे चुप न रहा गया और बोली—हमारे देखते-देखते गेअर बदल रहा है। तेरी ये हिम्मत। गेअर तो क्या मैं अपनी कार का एक पुर्जा भी नहीं बदलने दूंगी।

(९) एकं वाक्कीलम् उपगम्य कश्चित् आह—वाक्कील महोदय ! कंचिद् उपायम् एतादृशं ब्रूहि—येनाहं रज्जुमरणात् सुरक्षितः स्याम् । वाक्कीलः तम् अबोधयत् यत् न्यायाधीशस्य सम्मुखे "मैं मैं" इति शब्दात् अतिरिक्तं किमपि न वद । न्यायाधीशः "मैं मैं" इति शब्दैः तं प्रमत्तं मत्वा अत्यजत् । बहिरागत्य वाक्कीलः शुल्कदानाय तम् अवदत् तदापि सः "मैं मैं" इति अकरोत् ।

(१०) एकस्य जनस्य बहुप्रार्थने भगवान् तम् एकस्मै दिनाय स्वर्गे आकारयत् । तत्र अनेकाः सुन्दर्यः आसन् । सः एकस्याः सुन्दर्याः कर्णे किमपि अजमत् । एवं सा वार्ता कर्णात् कर्णं गत्वा सर्वासु सुन्दरीषु व्याप्ता । परिणामतः सर्वाः सुन्दर्यः स्वर्गं विहाय तेन सह पृथिवीम् आगन्तुम् उपचक्रमिरे । भगवान् सर्वा अपृच्छत्—अये ! ईदशी का वार्ताऽस्ति यद् भवत्यः स्वर्गं त्यक्त्वा गच्छन्ति ? एकाऽवदत्—एतस्य जनस्य समीपे एकः चलचित्रनायकः आगतः ।

(११) एकः जनः स्वोपचारं स्वयमेव करोति स्म । एकदा तस्य शिरसि पीडा सञ्जाता । सः कस्यचिद् हस्ते उपचारपत्रं दत्वा प्राहिणोत् । "सिरका" औषधीम् प्रेषय इति पत्रे लिखितम् आसीत् । प्रेषकः वस्त्रे किमपि सम्पुट्य पत्रे च किमपि लिखित्वा पुनः तदैव रोगिणे प्रेषितवान् । रोगी पत्रे अवाचयत् "सिरका" तु अद्य नास्ति परम् "पैरका" इति प्रेषयामि । तद् वस्त्रम् उद्घाट्य अपश्यत्—तत्रैकं पुरातनं पादत्राणम् आसीत् ।

(१२) एकस्मिन् दिने एकः नेमचिकित्सकः रुग्णम् अवदत्—यत् फलं तुभ्यम् अतिशयेन रुचिकरम् अस्ति, तस्य शल्कम् भक्षय । कथय—कतरत् फलं सर्वाधिकं रुचिकरम् अस्ति ? रुग्णः—नारिकेलम् ।

(९) एक वकील से किसी ने आकर कहा कि वकील साहब कोई ऐसा उपाय बताइये कि मैं फांसी पर चढ़ने से बच सकूं। वकील ने समझाया कि जज के सामने "मैं मैं" के अतिरिक्त और कुछ न बोलना। जज ने उसकी "मैं मैं" सुन उसे पागल समझकर छोड़ दिया। बाहर आकर वकील ने अपनी फीस मांगी तो वह "मैं मैं" करने लगा।

(१०) एक आदमी के बहुत प्रार्थना करने पर भगवान् ने एक दिन के लिए उसे स्वर्ग में बुला लिया। वहां अनेक सुन्दरियां थीं। उसने एक सुन्दरी के कान में कुछ कह दिया तो सभी सुन्दरियों में कानों कान वह बात फैल गई। परिणाम यह हुआ कि सभी सुन्दरियां स्वर्ग छोड़कर उसके साथ पृथ्वी पर आने लगीं। भगवान् ने सबसे पूछा कि भई ऐसी क्या बात है जो आप लोग स्वर्ग को छोड़कर जा रही हैं? एक बोली—इनके पास एक फिल्मी हीरो आए हैं।

(११) एक आदमी अपनी चिकित्सा स्वयं ही किया करता था। एक दिन सिर में दर्द होने पर उसने किसी के हाथ पर्चा देकर भेजा कि मुझे "सिरका" भेज देना। भेजने वाले ने कपड़े में लपेटकर और पर्चे में कुछ लिखकर हाथों हाथ भेज दिया। रोगी ने पर्चे में पढ़ा कि "सिरका" तो आज नहीं है हां "पैरका" भेज रहा हूं। उस कपड़े में खोलकर देखा तो एक पुराना जूता था।

(१२) एक दिन एक नीम हकीम ने एक रोगी को कहा कि जो फल तुम्हें सबसे अधिक पसन्द है उसका छिलका खा लेना। बताओ सबसे अधिक कौनसा फल पसन्द है? रोगी ने कहा—नारियल।

(१३) एकदा कस्यचित् मुद्रिका विलुप्ता। सः आरक्षिकायाम् मुद्रिकाहरणस्य प्रतिवेदनम् अकरोत्। आरक्षिकया अनेके जनाः धृताः। कालान्तरे मुद्रिका गृहे एव प्राप्ता। सः च मुद्रिकाप्रापणस्य सूचनाम् अकरोत्। तदा आरक्षिपतिः अवदत्—ये पञ्चषः जनाः अत्र तव मुद्रिकायाः हरणं स्वीकृतवन्तः तेषाम् अधुना अहम् किं कुर्याम्?

(१४) एकदा एकस्मिन् भोजे कस्यचित् पुरुषस्य पादम् एका महिला अतिबलेन मृदितवती। पुरुषः चीत्कारं कृत्वा अवदत्—अये! भाग्यवति! एतत् किं करोषि? सा महिला अवदत्—क्षम्यताम्। अहम् अबुध्यम् यदेषः मदीय पतिरस्ति।

(१५) एकस्मिन् आपणे दम्पती वस्तूनि अवलोकयन्तौ पृथक् २ भूतौ। पतिः आपणिकम् अवदत्—किं जानाति भवान्, मे पत्नी या अधुनैव मया सार्धम् आसीत् कुत्र गता? आपणिकः—अलं चिन्तया। मुहूर्तकं भवान् अत्र स्थितासु विक्रयवालासु कयाऽपि सह आलपतु। सा झटिति एव भवन्तं समेष्यति।

(१६) एकः छात्रः पठित्वा बहुदिवसानन्तरम् गृहं प्राप्तः तर्हि गृहस्य वृद्धेनैकेन एकस्मिन्नेव श्वासे अनेके प्रश्नाः पृष्टाः — कथय, केन विधिना अवसः? छात्रावासः कीदृशः आसीत्? सहपाठिनः अच्छाः आसन्? पठनम् सम्यक् प्रकारेण अभवत्? किमपि काठिन्यं तु नाभवत्? इत्यादयः। छात्रः अवदत्—एतावतां प्रश्नानाम् अहम् सहैव उत्तरं दातुं कथं समर्थः स्याम्? तदा वृद्धः अवदत् –अस्तु कयोरपि द्वयोः प्रश्नयोः उत्तरम् देहि।

(१७) कस्मिंश्चित् साक्षात्कार समये एकं प्रत्याशिनं प्रति अकथ्यत—पश्य वयम् एतस्मिन् कार्ये कंचित् अत्युत्तरदायिनं जनम् नियोक्तुम् इच्छामः। प्रत्याशी अचिरम् उदतरत्—मद्

(१३) एक बार किसी की अंगूठी गुम हो गई। उसने अंगूठी चोरी हो जाने की पुलिस में रिपोर्ट लिखा दी। पुलिस ने अनेक लोगों को पकड़ लिया। थोड़ी देर में अंगूठी घर में ही मिल गई और उसने मिल जाने की सूचना दी तो पुलिस अफसर कहने लगा—जो पांच-छः आदमी यहां आपकी अंगूठी चुराना मान चुके हैं अब मैं उनका क्या करूं ?

(१४) एक बार एक पार्टी में किसी आदमी का पैर एक औरत ने बड़े जोर से कुचल दिया। आदमी ने चिल्लाकर कहा—भागवान् ये क्या करती हो ? वह औरत बोली—मांफ करना। मैंने यह समझा ये कि मेरे पति हैं।

(१५) एक दुकान पर पति पत्नी सामान देखते-देखते बिछुड गए। पति ने दुकानदार से कहा कि क्या आपको मालूम है मेरी पत्नी जो अभी-अभी मेरे साथ थी, वह किधर चली गई ? दुकानदार—आप चिन्ता न करें। आप थोड़ी देर तक हमारे यहां खड़ी किसी सेल्स गर्ल से बातें करें। वे तुरन्त आपके पास पहुंच जायेंगी।

(१६) एक छात्र बहुत दिन तक पढ़कर बाहर से घर आया तो घर के किसी बड़े ने एक सांस में अनेक प्रश्न पूछ डाले। कहो कैसे रहे ? होस्टल कैसा था ? साथी तो ठीक मिले न ? पढ़ाई ठीक से चली ? कोई कठिनाई तो नहीं हुई ? इत्यादि। छात्र बोला—इतने सारे प्रश्नों का मैं एक साथ उत्तर कैसे दे सकता हूं ? तो बड़े बोले—अच्छा फिर किन्हीं दो प्रश्नों का उत्तर दो।

(१७) किसी मेंट के समय एक उम्मीदवार से कहा गया कि देखिये इस नौकरी पर हम किसी बहुत जिम्मेदार आदमी को रखना चाहते हैं। उम्मीदवार ने तुरन्त उत्तर दिया कि मेरे से अधिक जुम्मेदार

अधिकः उत्तरदायी भवतां कुत्रापि न प्राप्स्यते। यतोहि अहम् पञ्चदश-विंशतौ स्थानेषु कार्यानुभवं रक्षामि। तत्र २ स्थानेषु चोरीकरणापराधे प्रतिवारं मामेव उत्तरदायिनम् अस्थाप्यत।

(१८) एकः जनः कमपि छात्रम् अवदत्—अधुना धरणि-पृष्ठम् गुरुतरम् जातम्। सा कदापि निश्चला भवेत्। यस्मिन् मासे सा स्थास्यति, ततःप्रभृति सदैव स एव मासः भविष्यति। छात्रः अवदत्—यदि जूनमासे तिष्ठेत् तर्हि अतीव समीचीनं स्यात्। सः जनः अवदत् कथमेतत्? छात्रः सपद्युवाच—जूनमासे विद्यालयस्य अवकाशः भवति। पुनः कदापि विद्यालये गमन-संकटं न भविष्यति।

(१९) बालः मातरम् अवदत्—मातः! गत्वा पत्रमंजूषायां पत्रं क्षिपाणि? माता भर्त्सयन्ती अवदत्—न पश्यसि किम्, बहिः कियान् वर्षावेगः अस्ति? एतादृशे तु कश्चित् कुक्कुरः अपि बहिर्न यास्यति। बालः अवदत्—तर्हि किं क्रियेत? माता—गच्छ, स्वडैडीम् प्रेषय।

(२०) स्वामी (स्वभृत्याय)—श्यामू! वयं तव चत्वारिंशद् वर्ष-सेवया नितराम् प्रसन्नाः स्मः अस्यां च प्रसन्नतायाम् तुभ्यम् किमपि पारितोषिकं दातुमिच्छामः। भृत्यः—स्वामिन्! सत्य-मेव भवान् अतिदयालुः। एषा भवतो महती कृपा वर्तते। स्वामी-पारितोषिकं एतदेव यच्छामः यद् अद्यप्रभृति श्यामू नाम्नोऽपेक्षया वयं त्वां श्यामबाबू नाम्ना आकारयिष्यामः।

(२१) स्वामी (स्वभृत्याय)—त्वया जीवनार्धं यावत् अस्माक सेवा कृता। त्वं च अबुध्यः यदहम् अत्र वस्त्र-भोजनार्थ-मेव दासः। अद्यावधि तव समस्तवेतनम् अस्माकं समीपे एकत्रितम् अस्ति। गृहाण, एतत् सहस्ररूप्यकस्य चैकम्। तव वृद्धावस्थायाम् सहायकम् भविष्यति। भृत्यः प्रसन्नो भूत्व

आपको कहीं नहीं मिलेगा क्योंकि मुझे १५, २० स्थानों पर काम करने का अनुभव है। वहां चोरी के अपराध में हर बार मुझे ही जिम्मेदार माना गया है।

(१८) एक आदमी किसी विद्यार्थी से कहने लगा कि अब धरती की पीठ भारी हो गई है। वह कभी भी ठहर सकती है। जिस महीने वह ठहरेगी बस उससे आगे सदा वही महीना रहेगा। विद्यार्थी बोला—यदि जून के महीने में ठहर जाय तो बहुत अच्छा रहे। आदमी ने कहा, यह क्यों ? छात्र ने तुरन्त कहा—जून में स्कूल की छुट्टियां होती हैं। फिर कभी स्कूल जाने का झंझट नहीं होगा।

(१९) बच्चे ने कहा, माता जी लैटरबक्स में एक पत्र डाल आऊं ? माता जी डांटती हुई बोली, देखते नहीं बाहर कितने जोर की वर्षा हो रही है ! ऐसे में तो कोई कुत्ता भी बाहर नहीं जायगा। बच्चा बोला, तो फिर क्या किया जाय ? मां बोली—जा अपने डैडी को भेज दे।

(२०) मालिक (अपने नौकर से)—श्यामू हम तुम्हारी ४० साल की सेवा से बहुत प्रसन्न हैं और इस खुशी में तुम्हें कुछ इनाम देना चाहते हैं। नौकर—मालिक ! आप सचमुच बड़े मेहरबान हैं। यह आपकी बड़ी कृपा है। मालिक—इनाम यही देते हैं कि आज से हम तुम्हें श्यामू की जगह श्यामबाबू कहा करेंगे।

(२१) मालिक (नौकर से)—तुमने आधी जिन्दगी हमारी सेवा की है और तुम केवल रोटी कपड़े पर अपने को यहां नौकर समझते रहे ? तुम्हारा अब तक का सारा वेतन हमारे पास जमा है। लो यह हजार रुपये का चैक। तुम्हारे बुढ़ापे में काम आएगा। नौकर प्रसन्न

गिडगिडायते स्म तदा स्वामी अवदत्—एतत् (चैकम्) त्वया सुरक्षितं स्थापनीयम् । यदि भविष्येऽपि त्वम् एवमेव सेविष्यसे तर्हि अहम् एतस्मिन् हस्ताक्षरं विधास्यामि यत्त्वम् अधिकोशात् अविलम्बम् एव रूप्यकाणि ग्रहीतुम् समर्थः स्याः ।

(२२) कारागृहपतिः (बन्दिनं मुञ्चन्)—अये भ्रातः ! एतम् कारागृहकम्बलं कथम् बहि र्नयसि ? बन्दी—यतः श्वः मया पुनः अत्रैव आगन्तव्यम् ।

(२३) पिता (बालकं प्रति)—कथय, यत्त्वं भारतस्य नाम कथम् उन्नतं करिष्यसि ? बालः—पितः ! अहम् भारतस्य नाम लिखित्वा तत्र कुतुबमीनारस्य उपरि आलम्बयिष्ये ।

(२४) एकदा एकः सज्जनः स्वप्राणयणेन जले निमज्जन्तं बालम् अरक्षत् । सर्वे जनाः तस्मै अनेकशः साधुवादान् अददुः । बालस्य जनकः आगत्य तम् अवदत्—किं त्वमेव मम बालस्य जलाद् उत्तारः असि ? सज्जनः—वाढम्, परमेतत् मे कर्त्तव्यमासीत् । जनकः—कर्तव्यभाणिन् ! बालः यां टोपिकाम् (शीर्षणीम्) धारयति स्म सा कुत्रास्ति ? वद ।

(२५) एकवारम् एकस्मिन् विवाहभोजे कावपि पिता पुत्रौ रसगुल्ला-मिष्ठान्नं खादयतः स्म । पिता द्विचतुराणि भक्षयित्वा व्यरमत् । लज्जावशः पुत्रः अपि अवरुद्धः । परं सः पितरम् अकथयत्—पितृमहोदयः ! भक्षयतुनाम । पिता—अलं पुत्र अलम् । पुत्रः—पितः ! अधुना मामपि एवमेव पृच्छतु ।

(२६) एकः आरक्षिजनः रात्रौ उच्चतायाः अवतरन्तं द्विचक्रिजनम् अवदत्—तिष्ठ तव द्विचक्रिकायाम् वर्तिका नास्ति । द्विचक्रिकाम् इतोऽपि तीव्रां कुर्वन् द्विचक्रिजनः अवदत् —आरक्षिमहोदय ! दूरमपसर । अस्याम् अवरोधौ अपि न स्तः ।

होकर गिड़गिड़ाने लगा तो मालिक ने कहा—इसे सम्भालकर रखना। यदि भविष्य में भी तुम इसी प्रकार सेवा करते रहे तो मैं इस पर हस्ताक्षर कर दूंगा कि तुम बैंक से तुरन्त पैसे निकाल सको।

(२२) जेलर (कैदी को छोड़ते हुए)—अरे भाई ये जेल का कम्बल क्यों बाहर लिये जा रहे हो ? कैदी—इसलिए कि कल फिर मुझे यहीं आना है।

(२३) पिता (बच्चे से)—बताओ कि तुम भारत का नाम कैसे ऊंचा करोगे ? बालक—पिता जी ! मैं भारत का नाम लिखकर कुतुबमीनार के ऊपर टांग दूंगा।

(२४) एक बार एक सज्जन ने अपनी जान की बाजी लगाकर जल में डूबते हुए बच्चे को बचा लिया। सब लोगों ने उसे बहुत-बहुत धन्यवाद दिया। उसके पिता ने आकर कहा कि क्या तुम्हीं ने मेरे बच्चे को पानी से निकाला था ? सज्जन ने कहा—जी, यह मेरा कर्तव्य था। पिता बोला—कर्तव्य के बच्चे ? वह जो टोपी पहने हुए था वह कहां है ? बता।

(२५) एक बार एक शादी में पिता पुत्र दोनों रसगुल्ले खा रहे थे। पिता दो-चार खाकर बैठ गए। पुत्र को भी शरमा-शरमी रुकना पड़ा। फिर पुत्र ने कहा—पिताजी और खाइये न। पिता—बस बेटा, बस। पुत्र बोला—पिता जी अब मेरे से तो भी यही पूछिये।

(२६) एक पुलिस मैन ने रात में ऊंचाई से उतरते हुए साईकल वाले से कहा—ठहरिये तुम्हारी साइकल में बत्ती नहीं है। साइकल वाले ने साइकल और भी तेज करते हुए कहा कि सिपाही जी हट जाइये, इसमें ब्रेक भी नहीं हैं।

(२७) एकः जनः सम्भ्रमेण कमपि घटिकाधारिणम् अपृच्छत्—"तुम्हारी बजी में क्या घड़ा है!" घटिकाधारी अपि शीघ्रतायाम् उदतरत्—"नौने पौ"।

(२८) पुत्रः (जनकाय)—पितः! विद्यालये परीक्षाकालः वृथा गच्छति अतः परीक्षाभिः न भवितव्यम्। पिता—कथं तात! सः कालः वृथा किमिव याति? पुत्रः—परीक्षाकालः अतएव वृथा गच्छति यतः तद्दिनेषु पठनम् नितान्तम् अपि न भवति।

(२९) एका महिला (अन्याम् प्रति)—पश्य तावत् अस्मद् बाले अधुनाप्रभृत्येव स्वपितुः स्वभावः उद्भवति। अन्या—अहम् अपि शृणवानि कीदृशास्ते स्वभावाः? प्रथमा—अये! किं बहुना, एकः एष एव तावत् श्रूयताम् यत् सः सदैव भर्त्सनां सहते।

(३०) एकः औषधविक्रेता (जनताम् प्रति)—मम कियन्ति वर्षाणि व्यतीतानि निरन्तरम् औषधम् विक्रीणतः परं केनापि अद्यावधि परावृत्य प्रतिवेदनं न कृतम्। तत्रस्थितेषु जनेषु कश्चिदाह—किम् औषधम् सेवित्वा मृता अपि प्रतिवेदितुम् आगमिष्यन्ति?

(३२) एकः पुरुषः तस्य पत्नी च अन्योन्येन अतिदुःखितौ आस्ताम्। पुरुषः उवाच—ईदृशात् जीवनात् तु मरणमेव वरम्। हे ईश्वर! माम् उत्थापय। पत्नी अपि आक्रोशवती प्राह—एतस्मै (पत्ये) तु मृत्युर्नागच्छति। प्रभो! मामेव नय। पुरुषः सपदि आह—अस्तु भगवन्! त्वं प्रथमम् एतस्याः एव प्रार्थनाम् स्वीकुरु। अहम् निज-प्रार्थनापत्रम् प्रतिवर्तयामि।

(३२) एकस्मिन् न्यायालये स्थिताः तिस्रः महिलाः

(२७) एक आदमी ने हड़बड़ाहट में किसी घड़ी वाले से पूछा कि "तुम्हारी बजी में क्या घड़ा है?" घड़ी वाले ने भी जल्दी में उत्तर दिया कि "नौने पौ"।

(२८) पुत्र (पिता से)—पिता जी स्कूल में परीक्षाओं का समय बेकार जाता है, अतः परीक्षाएं नहीं होनी चाहियें। पिता—क्यों बेटे! वह समय बेकार कैसे जाता है? पुत्र—परीक्षाओं का समय इसलिए बेकार जाता है कि उन दिनों में पढ़ाई बिल्कुल नहीं होती।

(२९) एक औरत (दूसरी से)—देखो न हमारे मुन्ने को अभी से अपने पिता की आदतें पड़ती जा रही हैं। दूसरी—जरा हम भी तो सुनें कौनसी आदतें हैं वे? पहली—अरी बहुत क्या बताऊं? एक यही ले लो कि वह हमेशा डांट खाता रहता है।

(३०) एक दवाई विक्रेता (जनता से)—साहेबान! मैं लगातार कितने ही वर्षों से इस दवाई को बेचता आ रहा हूं, परन्तु किसी ने अभी तक वापिस आकर शिकायत नहीं की। खड़े हुए लोगों में से किसी ने कहा—क्या दवाई खाने वाले मुर्दे भी शिकायत करने आएंगे?

(३१) एक मर्द और एक औरत एक दूसरे से बड़े दुःखी थे। मर्द ने कहा—ऐसे जीने से तो मर जाना अच्छा है। हे ईश्वर मुझे उठाले। औरत ने झुंझलाते हुए कहा कि इन्हें तो मौत आती नहीं। हे ईश्वर तू मुझे ही ले जा। मर्द ने तुरन्त कहा—अच्छा भगवान् तू पहले इसी की बात मान ले, मैं अपनी अर्जी वापिस ले लेता हूं।

(३२) एक अदालत में खड़ी हुई तीन औरतें बार-बार बीच में

वारंवारम् मध्ये वदन्ति स्म। न्यायाधीशेन ताः अनेकशः वारिताः तदापि ताः न अमन्यन्तः। तर्हि न्यायाधीशः अवदत्—युष्मासु सा एव वदतु या वृद्धतमा स्यात्। पश्चात् आयुषः आधिक्य-भयात् तासु काऽपि नावदत्।

(३३) एकः प्रेमी स्वप्रेयसीं वाष्पयानेन प्रेषयन् आह—वचनं मे दत्त्वा गच्छ, यत्त्वं मयैव सह विवाहं करिष्यसि। प्रेयसी मौनम् अवलम्बितवती। प्रेमी पुनः अवदत्—शीघ्रं वद, नोचेत् अहम् अस्याः एव शकट्याः नीचैः आगत्य मरणं साधयिष्यामि। प्रेयसी अवदत्—एतादृशी अपि का शीघ्रता? अपराऽपि तु शकटी पश्चादेव आयाति।

(३४) एकः मनुष्यः (कामपि अन्यां महिलां प्रति)—अये! एषः तव बालोऽस्ति किम्? यः मम स्यूने बालुकाम् आपूरयति। महिला—नैव श्रीमन्! एषस्तु मदीयः भागिनेयः अस्ति। मे बालस्तु स अस्ति यः पश्चात् त्वदीयटोपे ष्ठीवति।

(३५) एकः भद्रः गृहे आगतान् अतिथिजनान् स्वगृहं दर्शयन् आह—एषः मे संगीत-कक्षः अस्ति। आगन्तुकाः आश्चर्येण अपृच्छन्—यदत्र मृदंगवाद्यादि किमपि नास्ति पुनः संगीतकक्षः किमिव? सः अवदत्—अहम् अत्र उपविश्य प्रतिवेशिनः रेडियो-यन्त्रम् शृणोमि।

(३६) एकः पिता स्वबालाम् चिकित्सालयम् नयति स्म। सहैव पुत्रोऽपि आसीत्। पिता बालम् अपृच्छत्—पुत्र! ज्ञापय, तत्र भगिन्या मृत्तैलम् कथम् पीतम्! पुत्रः—पितः! वार्ता एषाऽस्ति यदावयोः शपथः आसीत्—पश्यावः यत् मृत्तैलं प्रथमं कः पिबति? तदेषा प्रथमा भूत्वा आजिम् अजयत्।

(३७) एकः भद्रः वस्त्रालम्बनाय स्वभित्तिकायाम् एकम्

बोल पड़ती थीं। जज ने उन्हें बार-बार रोका। फिर भी वे बाज न आईं तो जज ने कहा—तुम में से वही पहले बोलेगी जो सबसे बड़ी-बूढ़ी होगी। बाद में बड़ी उमर हो जाने के डर से उनमें से कोई भी नहीं बोली।

(३३) एक प्रेमी ने अपनी प्रेमिका को गाड़ी में विदा करते समय कहा कि वादा करके जाओ कि तुम मुझसे ही शादी करोगी। प्रेमिका चुप रही। प्रेमी पुनः बोला—जल्दी बताओ नहीं तो मैं इसी गाड़ी के नीचे आकर अपनी जान दे दूंगा। प्रेमिका बोली—ऐसी भी क्या जल्दी है? अगली गाड़ी भी तो पीछे ही आ रही है।

(३४) एक मनुष्य (किसी दूसरी औरत से)—एजी, ये लड़का तुम्हारा है क्या? जो मेरे जेब में रेता भर रहा है। औरत—नहीं साहब! ये तो मेरा भानजा है। मेरा लड़का तो वह है जो पीछे से तुम्हारे टोप में थूक रहा है।

(३५) एक सज्जन ने घर में आए हुए मेहमानों को अपना घर दिखाते हुए कहा कि यह मेरा संगीत का कमरा है। मेहमान आश्चर्य में होकर पूछने लगे कि यहां तबला, बाजा आदि कुछ भी नहीं है फिर संगीत का कमरा कैसे है? उसने कहा—मैं यहां बैठकर पड़ौसी का रेडियो सुनता हूँ।

(३६) एक पिता अपनी पुत्री को हस्पताल ले जा रहे थे। साथ लड़का भी था, पिता ने उससे पूछा—बेटे बताओ तुम्हारी बहन ने मिट्टी का तेल क्यों पिया? लड़का—पिता जी बात यह है कि हम दोनों में शर्त लग गई थी कि देखें मिट्टी का तेल कौन पहले पीता है? यह पहल करके शर्त जीत गई।

(३७) एक साहब ने कपड़े टांगने के लिए अपनी दीवार में एक

कीलकम् न्यखनत्। प्रतिवेशी झटिति आगत्य अवदत्—मे गृहे भवत्कीलकं पर्याप्तं बहिरागतम्। किमहम् तस्मिन् स्ववस्त्राणि आलम्बयेयम्?

(३८) कश्चित् जनः एकाकिनं बालं कन्दुकेन क्रीडन्तम् दृष्ट्वा अवदत्—यत्त्वम् एकाकी एव कन्दुकेन क्रीडसि? बालः अकथयत्—नैव, अहम् ईश्वरेण सह कन्दुक-क्रीडाम् करोमि। सः जनः साश्चर्यम् अवदत्—ईश्वरेण सह कथं क्रीडसि? बालः अवोचत् पश्यतु तावत्—यदहं वारं-वारं कन्दुकम् उपरि क्षिपामि, ईश्वरश्च तत् माम् प्रति क्षिपति।

(३९) पुत्रः चलचित्र-दर्शनोपरान्तं मातरम् अपृच्छत्—अम्ब! चलचित्रम् कीदृशम् आसीत्? माता—मया तु दृष्टम् नैव। पुत्रः—अधुनैव तु त्वं मया सह उपविश्य अपश्यः, पुनः कथं वदसि मया न दृष्टमिति? माता—रहस्यम् एतदस्ति अग्रे चलचित्रपटे वारं-वारं तव ज्येष्ठपितृव्यः इव कोऽपि समायाति स्म। अत एव अहन्तु अवगुण्ठने एव आसम्।

(४०) स्वामिनी (भृत्याम् प्रति)—पश्य, मुहुर्मुहुः कथनं मह्यं न रोचते। अतः मे हस्तसंकेतेनैव अवबुध्य अचिरम् आगच्छेः। भृत्या—मह्यम् अपि पुनः पुनः वारणम् न रोचते। अतः मम शिरसः कम्पनेनैव भवत्या बोधितव्यम्-यदहम् आगन्तुम् नेच्छामि।

(४१) भूमिफलविक्रेता—बाबूमहोदय! चतुराणकेन पंचाशत् ग्रामाः भूमिफलानि गृह्यन्ताम्। बाबू—केवल पंचाशत् ग्राम-मात्राण्येव? भूमिफल विक्रेता-महोदय! एतान्यपि श्रीघ्रम् गृहीत्वा भक्षय अन्यथा मूल्यानां शीघ्रतया वर्धनेन चतुराणकेन चत्वारि एव प्राप्यानि न स्युः। पश्चाद् बालानां समक्षे कथयितुं शक्ष्यति यद् अहम् कदापि चतुराणकेन पंचाशद् ग्रामान्भूमि-फलानि अभक्षयम्।

लम्बी कील ठोक दी। पड़ौसी ने झट आकर कहा कि मेरी ओर आपकी कील काफी निकल आई है। क्या मैं उस पर अपने कपड़े टांग लूं ?

(३८) किसी आदमी ने बच्चे को अकेले गेंद खेलते हुए देखकर कहा कि अकेले ही गेंद खेल रहे हो। बच्चे ने कहा नहीं, मैं ईश्वर के साथ गेंद खेल रहा हूँ। आदमी ने आश्चर्य से कहा—ईश्वर के साथ कैसे खेल रहे हो ? बच्चे ने कहा, देखो न। मैं बार-बार गेंद को ऊपर फेंकता हूं और ईश्वर उसे मेरी ओर फेंक देता है।

(३९) पुत्र ने पिक्चर देखने के बाद मां से पूछा—मां सिनेमा कैसा लगा ? मां—मैंने तो देखा ही नहीं। पुत्र—मां अभी तो तू मेरे साथ बैठी देख रही थी फिर क्यों कहती है कि देखा नहीं ? मां—बेटा बात यह है कि आगे तस्वीर में बार-बार तुम्हारे ताऊ जैसा कोई आ जाता था, इसलिये मैं तो घूंघट में ही रही।

(४०) मालकिन (नौकरानी से)—देखो मुझे बार-बार कहना अच्छा नहीं लगता, इसलिए मेरे हाथ के इशारे से ही तुरन्त समझ कर आया करो। नौकरानी—मुझे भी बार-बार मना करना अच्छा नहीं लगता इसलिये मेरे सिर हिलाते ही तुरन्त समझ लिया करें कि मैं आना नहीं चाहती।

(४१) मूंगफली वाला—बाबू जी ४ आने की ५० ग्राम मूंगफली ले लो। बाबू बस ५० ग्राम ही ? मूंगफली वाला—अजी इन्हें भी जल्दी लेकर खा लो, कहीं मूल्यों के तेजी से बढ़ते रहने से ४ आने की ४ ही न रह जायें। बच्चों से कह तो सकोगे कि हमने पहले जमाने में ४ आने की ५० ग्राम भी खाई थीं।

(४२) पत्नी (पतिम् प्रति)—महोदय ! शृणोति, अद्य तैलम् "आउट ऑफ स्टाक" अस्ति । पुत्रः अपृच्छत्—पितः "आउट ऑफ स्टाक" इति किम् भवति । पिता—पुत्र ! यदा किंचिद् वस्तु गृहे न भवति तदा तद् "आउट ऑफ स्टाक" इति कथ्यते । एकदा पिता गृहे न आसीत् । तदा कश्चिद् आगत्य अपृच्छत्—तव पिता गृहे अस्ति किम् ? पुत्रः अचिरम् अवदत्—नैव, पितृमहोदयः अद्य "आउट ऑफ स्टाक" अस्ति ।

(४३) एकदा एका महिला सम्भ्रमेण एव स्व कारयानं यानकक्षे स्थापयित्वा गृहे च आगत्य अवदत्—अहम् शीघ्रं शीघ्रं कारं धावयित्वा आनयम्, यतः कुत्रापि घट्टनं न भवेदिति ।

(४४) एकः यात्री (कमपि)—भ्रातः ! चिकित्सालयं का सरणिः याति ? अपरः—अलं चिन्तया, सर्वाः सरणयः चिकित्सालयं गच्छन्ति । परं भवान् केनापि मोटरयानेन घट्टतु तदैव ।

(४५) कश्चित्—भ्रातः अहम् श्मशानभूमिं गन्तुम् इच्छामि । कथम् यानि ? श्रोता—श्मशान भूमिम् नेतारः तु बहवः भवन्ति । परं भवता चत्वारः अपि न प्राप्ताः ?

(४६) पुत्रः (पितरम् प्रति)—पितः ! अद्य मया पञ्च मक्षिकाः गृहीताः । तासु तिस्रः मातृमक्षिकाः द्वौ च नरमक्षौ आसन् । पिता—त्वम् कथम् अवागमः यत् तासु तिस्रः मातृमक्षिकाः आसन् ? पुत्रः—यतः तासु तिस्रः एव मातुः लिपस्टिकरागे उपविष्टाः आसन् ।

(४७) एकः गृहपतिः स्वगृहस्य अग्रे To let (भाटकाय रिक्तम्) इति लिखित्वा एकां पट्टिकां लम्बितवान् । सहैव एतदपि लिखितम् यत् वयं तस्मै एव गृहं दास्यामः यस्य पत्नी-शिशवः च न स्युः । तां पठित्वा एकः नपुंसकः तत्रागतः, अवदत् च—मम केचिदपि पत्नी-शिशवः न सन्ति, मह्यम् गृहं दीयताम् ।

(४२) पत्नी (पति से)—अजी सुनते हो आज तेल 'आउट ऑफ स्टाक' है। पुत्र ने पूछा पिता जी 'आउट ऑफ स्टाक' क्या होता है ? पिता—बेटा, जब कोई वस्तु घर में नहीं होती, तब उसे 'आउट आफ स्टाक' कहते हैं। एक बार पिता जी घर में नहीं थे तब किसी ने आकर पूछा तुम्हारे पिता जी घर में हैं ? पुत्र ने तुरन्त कहा—नहीं, पिता जी आज 'आउट ऑफ स्टाक' हैं।

(४३) एक बार एक औरत ने हड़बड़ाहट में अपनी कार गैरेज में खड़ी की और घर में आकर बोली कि मैं बहुत जल्दी-जल्दी कार दौड़ाकर लाई हूं कि कहीं एक्सीडेंट न हो जाय।

(४४) कोई यात्री (किसी से)—भाई हस्पताल को कौन सी सड़क जाती है ? दूसरा—आप चिन्ता न करें, सभी सड़कें हस्पताल को जाती हैं, आप किसी मोटर से टकरायें तभी तो।

(४५) कोई—भाई मुझे श्मशान भूमि जाना है। कैसे जाऊं ? सुनने वाला—क्या आपको वहां पहुंचाने वाले चार आदमी भी नहीं मिले ?

(४६) पुत्र (पिता से)—पिता जी आज मैंने ५ मक्खियां पकड़ीं। उनमें से तीन मादा मक्खियां थीं और दो नर मक्खियां। पिता—तुमने कैसे जाना कि उनमें से तीन मादा मक्खियां थीं ? पुत्र—क्योंकि उनमें से तीन ही मम्मी की लिपस्टिक पर बैठी थीं।

(४७) एक मकान मालिक ने अपने घर के आगे To Let (किराये के लिए खाली) है लिखकर टांग दिया और साथ ही यह भी लिखा कि हम उसी को मकान देंगे जिसके बीवी बच्चे न हों। उसे पढ़कर एक खुसरा अन्दर आ गया और कहने लगा—मेरे कोई बीबी, बच्चे नहीं हैं, मुझे मकान दीजिये।

(४८) एकस्मिन् काले कयोरपि दम्पत्यो र्मध्ये बालम् अधिकृत्य महान् विवादः सञ्जातः। पत्नी कथयति स्म—अहं स्ववालकम् चिकित्सकं करिष्यामि। पतिः कथयति स्म—नैव अहम् तु तं शिल्पिनं निर्मापयिष्यामि। द्वावेव स्वस्वपक्षे अचलौ भूत्वा कलहायेते स्म। कश्चिद् भद्रः तत्रागत्य प्राह—तिष्ठतम्, अस्य निर्णयः अधुनैव भवति, आकारयतम् पुत्रकम्। द्वौ सहैव—पुत्रः! पुत्रस्तु जातः एव न।

(४९) एकः सज्जनः कमपि स्वेषां चतुर्णाम् पुत्राणां परिचयम् अकारयत्—एषः मम ज्येष्ठः पुत्रः शिल्पी अस्ति। एषः तस्यानुजः चिकित्सकः अस्ति। एषः तृतीय अधिकारी अस्ति! आगन्तुकः—साधु। भ्रातः साधु। भवतः, चतुर्थपुत्रः कस्मिन् पदे अस्ति। पिता—एतं दृष्ट्वा तु अहम् लज्जाम् अनुभवामि। पठितः नास्ति, नापितः वर्तते। आगन्तुकः—छि छि छि, तुषारपातः अभवत्। निस्सारय एनम्। पिता—एनं निस्सारयितुम् अपि अक्षमोऽस्मि। यतः गृहस्य निर्वाहम् एष एव करोति।

(५०) एकस्मिन् पत्रे विज्ञापनम् आसीत् यत् अमुक कार्ये दशवर्षाणाम् अनुभवी स्नातकः वाञ्छितः। योग्याः पुरुषाः शीघ्रं मिलन्तु। एकः भद्रपुरुषः तत्र प्राप्तः। तम् अपृच्छत्—भवान् बी० ए० असि? सः—बी० ए० किम्, अहन्तु ए बी अपि न जानामि। भवतः कियान् अनुभवः? सः—अहन्तु केवलं भोजनाच्छादनस्य खट्वायाम् लोठनस्य च अनुभवं रक्षामि, नान्यम्। साक्षात्कारकः आक्रोशेन अवदत्—पुनर्भवानत्र किमर्थम् आगतः? सः अवदत्—अहन्तु अत्र निषेधार्थम् आगतः यद् भवद्भिः मामाश्रितैः न स्थातव्यम्।

(४८) एक बार किसी पति पत्नी में पुत्र को लेकर बड़ा झगड़ा बढ़ गया। पत्नी कहती मैं अपने बच्चे को डाक्टर बनाऊंगी। पति कहता कि नहीं मैं तो उसे इंजीनियर बनाऊंगा। दोनों अपनी अपनी बातों पर अड़े लड़े जा रहे थे। किसी सज्जन ने आकर कहा – भई ठहरो, इसका निर्णय अभी हो जाता है, बुलाओ पुत्र को। दोनों एक साथ—पुत्र ! वह तो अभी हुआ ही नहीं।

(४९) एक सज्जन ने अपने चार बेटों का किसी को परिचय कराया—ये मेरे बड़े लड़के इंजीनियर हैं। ये उससे छोटे डाक्टर हैं। ये तीसरे आफीसर हैं। आगन्तुक—वाह भाई वाह ! आपके चौथे बेटे क्या हैं ? पिता—इसे देखकर तो मुझे शर्म आती है। पढ़ा-लिखा कुछ नहीं, हज्जाम है। आगन्तुक—छि छि सब पर पानी फेर दिया, निकालो इसे। पिता—इसे मैं निकाल भी नहीं सकता, क्योंकि घर का खर्चा यही चलाता है।

(५०) एक अखबार में विज्ञापन था कि हमें अमुक काम में १० वर्ष का अनुभव रखने वाला ग्रेजुएट चाहिए तुरन्त मिलें। एक सज्जन वहां पहुँचे। उनसे पूछा गया—क्या आप बी.ए. हैं। वह—जी, बी.ए. क्या मुझे तो ए बी भी नहीं आता। आपको अनुभव ? वह बोले—मुझे तो केवल खाने पीने और चारपाई पर पड़े रहने का ही अनुभव है और कुछ नहीं। भेंटकर्ता ने भी झुंझलाकर कहा—फिर आप यहां क्यों आए हो ? वह बोले—मैं यहां मना करने आया था कि आप मेरे भरोसे पर न रहें।

(५१) एकस्मिन् विद्यालये निरीक्षकः आगत्य एकम् बालम् अपृच्छत्—कथयतु तावत् 'मा' किमत्यः भवन्ति ? छात्रः—महोदय ! द्वे भवतः, एका स्व-मा (माता) अपरा च भारतमा। एकः अन्यः छात्र उत्थाय अकथयत्—महोदय ! 'मा' तिस्रः भवन्ति । एका स्व-मा, द्वितीया भारतमा, तृतीया च "सिनेमा"।

(५२) अभ्यापकः छात्रान् अपृच्छत्—कथयन्तु हिन्दी भाषायां कतिवचनानि भवन्ति ? एकः अवदत्—द्वे वचने भवतः, एकवचनं बहुवचनम् च । एकः अन्यः छात्रः उत्थाय अवदत्—महोदय ! एकम् अन्यः वचनः अपि भवति । अध्यापकः—कः सः ? छात्रः—गुरुवचनः (छात्रानाम) इति ।

(५३) द्वारे "प्रवेशः निःशुल्कः" इति लिखितम् आसीत् । पठित्वा बहवः जनाः कार्यक्रमं दृष्टुम् अन्तः प्राविशन् । परावर्तन-काले सर्वेभ्यः पणकाः गृह्यन्ते स्म । तर्हि जनाः अवदन्—भवता द्वारे तु "प्रवेशः निश्शुल्कः" इति लिखितम् पुनः पणकग्रहणं किमर्थम् ? उत्तरम्—सत्यम् प्रवेशस्तु निश्शुल्क एव । परम बहिर्गमनम् निःशुल्कम् नास्ति ।

(५४) बसस्थाने स्थितः एकः पुरुषः अपरम् अवदत्—हलो, श्रीमन् हलो । किं भवान् न स्मरति यदहं भवन्तम् काश्मीरदेशे अमिलम् । अपरः—महोदय ! अहन्तु कदाचित् अपि कश्मीरान् नागमम् । प्रथमः—अहमपि तु नागमम् । अपरः—पुनः भवान् तत्र मया कथ मिलितः ? प्रथमः—अस्तु तावत् कौचित् अन्यौ एव तत्र मिलितौ स्याताम् ।

(५५) निरीक्षकः विद्यालये एकं बालकम् अनेकान् प्रश्नान् अपृच्छत् परम् सः एकस्य अपि उत्तरम् न अददात् । निरीक्षकः अवदत्—किं त्वां लज्जा नायाति । बालः—श्रीमन् ! आयाति तु । परं सा आयाति तदैव च गच्छति ।

(५१) एक स्कूल में इन्सपेक्टर जी आए। उन्होंने एक बच्चे से पूछा—बताओ तो भला "मा" कितनी होती हैं ? छात्र—जी दो होती हैं, एक अपनी मां और दूसरी भारत मां। एक अन्य लड़का खड़ा होकर कहने लगा – जी मां तीन होती हैं—एक अपनी मां, दूसरी भारत मां और तीसरी सिनेमा।

(५२) अध्यापक ने छात्रों से पूछा कि बताओ हिन्दी में कितने वचन होते हैं ? एक ने कहा—जी, दो होते हैं—एक वचन और बहुवचन। एक अन्य लड़का खड़े होकर कहने लगा—जी, एक तीसरा वचन भी होता है। अध्यापक—कौन सा ? छात्र—जी ! गुरवचन। (किसी छात्र का नाम)।

(५३) द्वार पर 'प्रवेश निःशुल्क' लिखा था। पढ़कर बहुत से लोग अन्दर प्रोग्राम देखने घुस आए। वापिस जाते समय सबसे पैसे लिए जाने लगे तो लोगों ने कहा—कि आपने तो द्वार पर प्रवेश निःशुल्क लिखा हुआ है फिर पैसे किस बात के ? उत्तर—ठीक है प्रवेश तो निःशुल्क है परन्तु बाहर जाना निःशुल्क नहीं है।

(५४) एक बस स्टाप पर खड़े एक सज्जन ने दूसरे से कहा कि हैलो मिस्टर हैलो। क्या आपको याद नहीं मैं आपसे कश्मीर में मिला था। दूसरा—जी मैं तो कभी कश्मीर गया भी नहीं हूं। पहला—गया तो मैं भी नहीं हूं। दूसरा—फिर आप वहां मुझसे कैसे मिले ? पहला—अच्छा हम दो नहीं तो कोई और दो ही वहां मिले होंगे।

(५५) इन्सपेक्टर ने स्कूल में एक लड़के से कई प्रश्न पूछे परन्तु उसने एक का भी उत्तर नहीं दिया। इन्सपेक्टर बोले—क्या तुम्हें शर्म नहीं आती ? लड़का—जी आती तो है। परन्तु वह आती है और तभी चली जाती है।

(५६) जाले कन्दुके आगत एव जनाः उच्चैः अवदन्—गोलम् गोलम् गोलम्। एकः देहाती अवदत्—एतत् जालम् तु चतुःकोणम् अस्ति पुनः भवन्तः 'गोलम् गोलम्' इति कथम् वदन्ति ? लोकाः—अये भ्रातः ! यदा कन्दुकम् अस्मिन् (जाले) आगच्छति तदा 'गोलम्' भवति। देहाती—किं कथयन्ति यदा कन्दुकम् आयाति तदा 'गोलम्' भवति ? अरे भ्रातरः ! कन्दुकम् तु पूर्वमेव 'गोलम्' भवति।

(५७) एकस्मिन् मद्यापणे विडाली मूषकम् अनुधावति स्म। मूषकः मद्यभाण्डे अपतत् तस्य च उदरे स्वल्पं मद्यं प्राप्तम्। विडाली तत्रैव उपविष्टा चिन्तयति स्म यद् एष बहिः निर्गच्छेत् चेत् तर्हि अहम् एतम् भक्षयामि। मुहूर्तं स्थित्वा येन केन प्रकारेण मूषकः बहिरागच्छत् अवदत् च—विडाली कुत्रास्ति ?

(५८) शीतकाले एकः बाबूः स्वां विडालीम् शीतले जले फेनिलेन सम्मर्द्य स्नपयति स्म। कश्चित् सुहृत कुत्रापि गच्छन् आह—एतत् किं करोषि ? शीतेन सा मरिष्यति। बाबूः अवदत्—न न भोः एकद्विवारं स्नापनेन किमपि न भवति। यदा तत् मित्रम् परावर्तत तर्हि सत्यमेव विडाली मृता आसीत्। मित्रम् अवदत्—अहन्तु पूर्वमेव अकथयम् यदेषा मरिष्यति। सः अवदत्—विडाली स्नपनेन न मृता अपितु मम निचोलनेन मृता।

(५९) एकः बालः साहसं कृत्वा स्वपितरम् अवदत्—यथा भवान् मां ताडयति किं भवतः जनकः अपि भवन्तम् एवमेव ताडयति स्म। पिता—एवम्, अपराधे कृते इदृगेव ताडयति स्म। पुत्रः—किं भवज्जनकम् अपि भवत्पितामहः ताडयति स्म ? पिता—कथन्न। पुत्रः—किं भवत्प्रपितामहः अपि भवत्पितामहम् अताडयत् ? पिता—आम्, आम्, सोऽपि तं

(५६) नैट में गेंद आते ही लोग चिल्लाए—गोल, गोल, गोल। एक देहाती बोला—ये जाल सा तो चौकोर है फिर आप लोग गोल-गोल क्यों चिल्ला रहे हैं ? लोग—अरे भाई जब गेंद इसमें आती है तो गोल होता है। देहाती—क्या कहते हो जब गेंद आती तब गोल होता है ? अरे भाई गेंद तो पहले ही गोल होती है ?

(५७) एक शराब खाने में बिल्ली चूहे के पीछे भाग रही थी कि चूहा शराब में जा पड़ा और उसके पेट में थोड़ी सी शराब चली गई। बिल्ली वहीं बैठी सोच रही थी कि यह निकले तो इसे खाऊं। थोड़ी देर में चूहा निकला और बोला—बताओ बिल्ली कहां है ?

